International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2014; 1(1): 41-44
© 2014 IJSR
www.anantaajournal.com
Received: 21-09-2014
Accepted: 26-10-2014

**डॉ0 स्नेहलता**
व्याख्याता, एस. पी. एस. सेमिनरी
+2 स्कूल, सोनपुर, बिहार, भारत

**Corresponding Author:**
**डॉ0 स्नेहलता**
व्याख्याता, एस. पी. एस. सेमिनरी
+2 स्कूल, सोनपुर, बिहार, भारत

# संस्कृतनाटककारभासस्य कृतित्वम्

**डॉ0 स्नेहलता**

**प्रस्तावना**

संस्कृतनाट्यसाहित्ये नाटककार: भास: आद्य: नाटककारोऽस्ति । संस्कृतनाटकानां विकासस्येतिहासे भास: स्वकीर्तिकौमुदीं दक्षिणत: आरभ्य उदीचीं यावत् तथाप्राचीत: प्रारभ्य प्रतीचीं यावत् प्रसृतवान् अस्ति । भासस्य नाटकेषु नाटकस्य तद्रूपं दृष्टिगतं भवति यस्मात् कारणात् आचार्य: भरत: नाटकं पञ्चमं वेदम् अमन्यत् (स्वीकृतवान्) । नाटकं कवित्वस्य चरं परिपाक: भवति– 'नाटकान्तं कवित्वम्।[1]

तत्र त्रयाणां लोकाणां भावानां समावेश: भवति । अनया दृष्ट्या भासस्य नाटकानां महत्त्वम् अधिकतरं वर्धते । भास: मानवीयभावनानां सफलतापूर्वकं चित्रणं कृतवान् अस्ति । भास: त्रयोदशरूपकाणि रचितवान् अस्ति । स: तेषां प्रस्तुति करणेऽपि पर्याप्तं साफल्यं लब्धवान् अस्ति । भासस्य नाटकानां प्रमाणिकतां प्रति अविश्वास: न कर्तुं शक्यते, यत: सर्वेषां नाटकानां भाषा शैली च समानरूपेण वाग्धारान्विता सरला, प्राञ्जला च अस्ति । एतेषु नाटकेषु भावानां तथा विचाराणां पुनरूक्ति: तथा पात्राणां नामसु समरूपता प्राप्यते । पुनश्च सर्वेषु नाटकेषु प्रस्तावनाया: स्थाने स्थापना शब्दस्य प्रयोग: विहितोऽस्ति । संस्कृतसाहित्यस्य नाट्य संसारे भासस्य स्वकीयं विशिष्टं स्थानम् अस्ति ।[2]

नाट्यशास्त्रीयग्रन्थेषु रूपकस्य दशभेदा: सन्ति । वस्तुनेतारसतत्त्वै: रूपकं दशधा विभज्यते विश्वनाथानुसारं रुपक भेदा: निम्नप्रकारेण निर्दिष्टा सन्ति–

नाटकमथ प्रकरणं भाणव्यायोगसमयवकारडिमा: ।
इहामृगांकवीथ्य: प्रहसनीमिति रूपकाणि दश ।।''[3]

**कृतित्त्वम्**

महाकवि: भास: कृतित्वेन प्रख्यातानि त्रयोदशनाटकानि सर्वप्रथमं नवोत्तरऊनविंशतितमे (1909) खीष्टाब्दे श्री महामहोपाध्यायै टी0 गणपति शास्त्रिमहोदयै त्रिवेन्द्रमिति स्थानात् प्राकाश्य नीतानि । ऐषु नाटकेषु स्वप्नवासवदत्तम् उदयनवासवदत्तयो: प्रणयकथानकम् आश्रित्य महत्वपूर्णं नाटकम् अस्ति । अत्र भाषस्य नाट्यकलाया: उत्कर्ष: दृश्यते । भासस्य त्रयोदशनाटकानि निम्नांकितानि उपलभ्यन्ते ।[4]

(1) प्रतिमानाटकम् (2) अभिषेक:
(3) बालचरितम् (4) उरूभंगनाटकम्
(5) दूतघटोत्कचनाटकम् (6) दूतवाक्यम्
(7) कर्णभारनाटकम् (8) मध्यमव्यायोगनाटकम्
(9) पञ्चरात्रम् (10) प्रतिज्ञायौगन्धरायणम्
(11) स्वप्नवासवदत्तम् (12) अविमारकम् (13) दरिद्रचारुदत्तम्

भासस्य नाट्यप्रणयननैपुण्यं नूनं किमपि लोकोत्तररमणीयत्त्वम् अवगाहते । 'भाषा सु मधुरा कोमलपदविन्यासशालिनी च भावभंगी हृदयंगमा, विषयोपन्यास सरणीश्चनितरसाधारणी, कमनीयकवित्त्वालङ्कृता चरना च कापि निरतिशयचमत्कारिणी । किं बहुना, महाकविनाऽधुना स्वीये नाटकचक्रे काऽप्यपूर्वैव रीतिराविष्कृता, या किल तदनुजातैर्महाकविभिरप्यनुसृता कालिदासादिभिः ।

भासस्य पूर्वोक्तरूपकउपजीव्य कथानकानुसारेण भागचतुष्टयं विभज्यते ।[5]

1. रामायणमूलकरूपकम् – प्रतिमाननाटकम् अभिषेकनाटकं च ।
2. कृष्णकथामूलकरूपकम् – बालचरितम्, एकमात्रएतत एव प्रसिद्धम् अस्ति ।
3. महाभारतमूलकरूपकम् – उरुभंङ्गनाटकम्, दूतघटोत्कचनाटकम्, दूतवाक्यम्, कर्णभारनाटकम्, मध्यमव्यायोगनाटकम्, पञ्चरात्रम् च एतानि षड् रूपकाणि प्राख्यातानि सन्ति ।
4. बृहत्कथामूलकरूपकम् – अर्थात् गुणाढ्यनिर्मित बृहत्कथायाः कथानकस्य आधारे प्रतिज्ञायौगन्धरायणम्, स्वप्नवासवदत्तम, अविमारकम्, चारुदत्तम च एतानि चत्वारि नाटकानि प्रसिद्धानि सन्ति।

अत्र भासप्रणीतनाटकानां परिचयात्मकविवरणं प्रस्तूयते–

- **रामायणस्य आधारे लिखितानि रूपकाणि अधोनिर्दिष्टानि सन्ति–**

**(1) प्रतिमानाटकम् :–** अस्मिन् नाटके सप्तअङ्कानि सन्ति । अत्र रामायणस्य घटना रामस्य वनवासात् आरभ्य राज्याभिषेकं पर्यन्तवर्णितम् अस्ति । यदा भरतः स्वमातुलगृहात् प्रत्यागच्छति तदा मार्गे सः तद् स्थानं पश्यति । यत्र तस्य दिवंगतानां पूर्वजनां प्रतिमा संग्रहीता आसन् । तत्र स्वपितुः दशरथस्य प्रतिमामवलोक्यभरतः चकितः भवति । सः महाभयावह घटनायाः सूचनां प्राप्नोति । यदा रामः रावणेन योद्धुं सन्नद्धः भवति भरतः सेना द्वारा तस्य सहायतां करोति । यं घटना रामायणात् भिन्ना अस्ति । सितायाः स्वयंवरे असफलतां प्राप्ते रावणः परशुरामं रामस्य विरूद्ध समुत्सुकं करोति । सुर्पनखां च मन्थरायाः रूपे प्रेषयति । रावणरामयोः विरोधः आदितः अन्तं यावत् दर्शितोऽस्ति।

**(2) अभिषेकनाटकम् :–** अस्मिन् नाटके षट्अङ्कानि सन्ति यत्र बलिबद्धातराज्याभिषेकं यावत्याः कथा वर्णिता अस्ति । हनुमता लंकां प्राप्य भगवती सीतां प्रति सान्त्वनाप्रदानं तथा तत्र लङ्कायाः विनाशकरणं दहनं च रावणस्य सीतायाः सम्मुखरामलक्ष्मण्योः छिन्ने मस्तके दर्शयित्वा छलकरणम् अस्मिन् नाटके समाविष्टानि सन्ति ।[6]

- **कृष्णकथायाः आधारे लिखितम् रूपकम् अधोनिर्दिष्टम् अस्ति–**

**(3) बालचरितम् :–** अस्मिन् नाटके पञ्चअङ्कानि सन्ति । अत्र भागवतात् हरिवंशात् तथा विष्णुपुराणात् किञ्चित् परिवर्तितरूपे कृष्णजन्मतः कंशवधपर्यन्ता कथा वर्णिता अस्ति । कृष्णे प्रादूर्भूते नारदः तस्य दर्शनं कर्तुं गच्छति । वसुदेवः अष्टंबारे पुत्रस्य जन्मनि प्रसन्नतां प्रकटी करोति । परन्तु केसात् भयात् पुत्रं जमुनापारे वृन्दावने नेतुं निश्चयं करोति । मार्गे दिव्यास्त्राणि तस्य रक्षां कुर्वन्ति । वसुदेवः नन्दस्य पुत्रीं पुत्रस्य स्थाने नयति कंसाय च ददाति । कंशः प्रस्तरशिलायां पातयित्वा तां हतवान् ।

कृष्णः पुतनायाः प्रलम्बस्य धेनुकासुरस्य तथा कालीयादि राक्षसानां वधं कुर्वन्ति स च निज सौजन्येन समस्त वृन्दावनवासीनां स्नेहभाजनं भवति । कतिपय दिनेभ्यः पश्चात् यदा कंसः सत्यतां जानाति तत् सः कृष्णं निमन्त्रयति । प्रथमं कृष्णः हस्तिना युद्धं करोति कंसस्य च सभायां स्थितौ मुष्टिकां कनुराम च मुष्टिकाभिः हन्ति । इदानीं कंसस्य वधः भवति । कृष्णः स्वकीयं मातामहम् उग्रसेन राज्याभिषेकं करोति ।[7]

- **महाभारतस्य आधारे लिखितानि रूपकाणि अधेनिर्दिष्टानि सन्ति–**

**(4) उरुभंगनाटकम् :–** इदम् एकांकीयम् उत्सृष्टीकांकम् अस्ति तथा संस्कृतसाहित्ये एकमात्रं दुखान्तरूपकम् अस्ति । अत्र कौरवपाण्डवानाम् अन्तिमसंघर्षः भीम-दूर्योधनयोः गदायुद्धं वर्णितम् अस्ति । यस्यावसानम् दूर्योधनस्य उरुभंगे भवति । दूर्योधनस्य पुत्रः स्वकीयं पितरं मृतं दृष्ट्वा बहुशोकं करोति तथा दूर्योधनस्य पत्न्यः अपि करुणामयं विलापं कुर्वन्ति ।[8]

**(5) दूतघटोत्कचनाटकम् :–** इदं नाटकम् एकांकीमय अस्ति । अस्य कथानकं महाभारताश्रितम् अस्ति नाटकस्य कथा वस्तु अभिमन्योः मृत्योः पश्चात् घटित घटनाभिः सम्बद्धम् अस्ति । जयद्रथ द्वारा अभिमन्योः बद्धं कृते हिडिम्बा पुत्रः घटोत्कचः जयद्रथस्य समीपं गच्छति अर्जुनेन तस्य जयद्रथस्य भाविनाशस्य सूचनां ददाति । तदानीं कौरवाः स्वविजये बहवः प्रसन्नाः भवन्ति ।[9]

**(6) दूतवाक्यम् :–** इदं नाटकम् एकांकीयम् अस्ति । कौरवाणां सभायां द्रौपद्याः अपमानात् खिन्नाः भूत्वा पाण्डवाः योगिराजं भगवन्तं कृष्णं दूतं परिकल्प्य संधिप्रस्तावेन कौरवाणां समीपे प्रेषयन्ति । दूर्योधनः द्रौपद्याः अपमानीतायाः अतीव प्रसन्नतां प्रकटयति ।कृष्ण द्वारा पाण्डवेभ्यः अर्ध राज्यं याचिते दूर्योधनः तस्य प्रार्थनाम् अस्वीकरोति । कृष्णश्च विफल मनोरथः प्रति निवर्तते ।[10]

**(7) कर्णभारनाटकम् :–** इदं नाटकम् अपि एकांकीयम् अस्ति । कर्णः स्वदिव्यकर्णाभूषणं परशुराम द्वारा प्राप्तवान् आसीत् । परन्तु परशुरामस्य अस्मिन् विषये इदं वक्तव्यम् आसीत् यत् इदं तव आवश्यकता समये सफलं न भविष्यति । अर्जुनः यदा कर्णस्य समीपे युद्धार्थं संलब्धः भवति । शल्यः ब्राह्मणरूपे तत् कर्णाभूषणं याचते । कर्णः तस्मै ददाति तथा भीषणात्महानिं करोति ।[11]

**(8) मध्यमव्यायोगनाटकम् :–** इदं नाटकम् अपि एकांकीयम् अस्ति । अस्य ग्रन्थस्य रचना हिडिम्बायाः भीमस्य च विवाहस्य संस्मरणस्य आधारे कृता अस्ति । घटोत्कचः स्वमातुः हिडिम्बायाः आज्ञानुसारम् एकं ब्राह्मणं प्रताडयति यं हत्वा सः हिडिम्बायाः पार्श्वे नेतुम् इच्छति । भीमः ब्राह्मणं पश्यति तथा ते रक्षति ।

सः स्वयं तस्य स्थाने तस्याः राक्षस्याः निकटे गच्छति । हिडिम्बा स्वकीयं पतिं प्राप्य प्रसन्ना भवति । केवलं तं प्राप्त्यर्थम् एव सा एतत् सर्वं षडयंत्रं रचीतवती, इदं ज्ञापयति । घटोत्कचोऽपि पितरं प्राप्य परं प्रसन्नः भवति ।[12]

**(9) पञ्चरात्रम् :-** इदं त्रयाणाम् अङ्कानां समवक्षकारम् अस्ति । महाभारतस्य एका घटना तस्मात् किञ्चित् भिन्न रूपे वर्णिता अस्ति । गुरुद्रोणाचार्यः एकया युक्त्या पांडवेभ्यः अर्धं राज्यं दापयति । दूर्योधनः गुरुम् अब्रवीत् यदि पाण्डवाः मम पञ्चदिनानाम् अन्तराले प्राप्ताः भवेयूः तदहम् तेभ्यः अर्धं राज्यं दास्यामि । तदानीं पाण्डवाः विराटस्य भवने अज्ञातवासं कुर्वन्ति स्म । द्रोणस्य सहायता अभिमन्यूः सङ्केतं प्राप्यते तस्य च विवाहः विराटस्य पुत्र्या उत्तरया सह कार्यते एवं ज्ञाते दूर्योधनः स्वकथनानुसारम् अर्धं राज्यं पाण्डवेभ्यः ददाति प्रतिज्ञा च सत्या भवति ।[13]

- **गुणाढ्यनिर्मित-वृहत्कथायाः कथानकस्य अधारे चत्वारि नाटकानि अधोनिर्दिष्टानि सन्ति-**

**(10) अविमारकम् :-** अस्मिन् नाटके षट्अङ्कानि सन्ति । बृहत्कथायाः एकायाः कथायाः आधारे अस्य नाटकस्य रचना अभवत् । अत्र महाराजस्य कुन्ति भोजस्य पुत्रयाः कुरंग्याः अविमारकस्य नामधेयस्य राजकुमारस्य प्रेमकथा वर्णिता अस्ति । अविमारकः एकस्मात् गाजात् कुरंगीं रक्षति । तां प्रति अनुरक्तः भवति । सः शापवशात् स्वपित्रा महाराजसौवीरेण सह एकनिम्नजाति पुरुषेण तुल्यः निवसति । सः कुरङ्गयाः समीपे गमणार्थं चौरः इव तस्य गृहं गच्छति । अकस्मात् च निगृहितः भवति । सः मृत्युदण्डं प्राप्नोति । तस्मिन् समये नारदमुनेः आगमनं भवति । स च अविमारकम् सौविरस्य पुत्रम् उद्घोषयति । अस्य सत्यस्य प्रत्यक्षीभूते तयोः विवाहः भवति ।[14]

**(11) दरिद्रचारुतम् :-** अस्मिन् रूपके चत्वारि अङ्कानि सन्ति । अत्र ब्राह्मण चारूदत्तस्य गणिका वसन्तसेनायाश्च प्रेमकथा वर्णिता अस्ति । एकः निर्धनः ब्राह्मणः वसन्तसेनां प्रति अनुरतोऽस्ति । राज्ञः श्यालः शकारश्चापि अस्मिन् प्रेम प्रसङ्गे प्रतिद्वन्दी अस्ति । वसन्त सेना स्वकीया भूषणानि चारूदत्तस्य पार्श्वे नयस्याति यानि शारवीलकः चारूदत्तस्य गृहे सन्धिं कृत्वा चोरयति स्वकीयां प्रेमिकां मदनिकां वसन्तसेनायाः सेवायाः मुक्तां करोति । तत्पश्चात् उभयोः परिणयः भवति । इदम् आधृत्य शुद्रकः मृच्छकटिकनामकं प्रकरणं रचितवान् अस्ति ।[15]

**(12) प्रतिज्ञायौगन्धरायणम् :-** अस्मिन् नाटके चत्वारी अङ्कानि सन्ति । अस्मिन् वर्णितघटना स्वप्नवासवदत्तस्य घटनायाः पूर्वं घटिता अभवत् आसीत् । उज्जयिन्याः राजा प्रद्योतः वत्सराज उदयनस्य स्वपुत्र्या वासवदत्तया सह विवाहं कारयितुं छलेन आखेटकस्य प्रसङ्गे राजाउदयनं काञ्चित् त्रुटिं कारणात् महासेन द्वारा स निगडीतः । कारागारे महासेनः स्वपुत्रीं वासवदत्ताम् उदयनात् वीणावादनशिक्षण प्राप्तुं प्रेषयति । अस्याम् एव शिक्षायाः मध्ये उभौ परस्परं अनुरक्तौ भवतः । यदा वत्सराज्यस्य मन्त्री यौगन्धरायेणः ज्ञातवान् यत् मम स्वामिनं राजाप्रद्योतः छलेन गृहीत्वा अन्तःपुरे (कारागारे) स्थापितवान् तदा मन्त्री यौगन्धरायणः स्वकीयं स्वामिनम् उदयनं मोचयितुं प्रतिज्ञां कृतवान् । अनेन अस्य रूपकस्य नाम ''प्रतिज्ञा'' वा ''प्रतिज्ञायौगन्धरायणम्'' अभवत् । यौगन्धरायणः बहुकौशलेन स्वयं बद्धभूत्वा वासवदत्तया सह उदयनं वत्सराज्ये प्रेषितवान् ।[16]

**(13) स्वप्नवासवदत्तम् :-** अस्मिन् नाटके षटअङ्कानि सन्ति । कविवर्यस्य भासस्य रूपकेषु एतम् श्रेष्ठम् मन्यते । कल्पनायाः दृष्टेः इदं प्रतिज्ञायौगन्धरायणस्य अवशिष्टं भागम् अस्ति । अर्थात् स्वप्नवासवदत्तं प्रतिज्ञायौगन्धरायणस्य कथायाः उत्तरार्धम् अस्ति । यौगन्धरायणः वासवदत्तं राज्ञः वियुक्तां कृत्वा पदमावत्याः सम्मुखे त्यजति । सा च दग्धा इति घोषयति । पदमावत्याः राजश्च विवाहः राज्यस्य समृद्धयर्थं ज्योतिर्विदः आवश्यकम् उक्तवन्तः आसन् । स्वकीय प्रीयायाः वासवदत्तायाः दग्धायाः समाचारं श्रुत्वा उदयनः पद्मावत्या सह विवाहं करोति । किन्तु विवाहपश्चात् अपि पद्मावती पत्युः प्रणयं न प्राप्नोति अनेन कारणेन तां शिरोवेदना भवति । तस्याः अस्वस्थतायाः सूचनां प्राप्य राजा उदयनः समुद्रगृहं अगच्छत् । तत्र ताम् न दृष्ट्वा राजा तस्याः शय्यायां शयनं कृतवान् पद्वात्याः शिरोवेदनायाः समाचारं प्राप्य वासवदत्ता अपि तत्रैव गच्छति तथा शयनं कुर्वन राजानं पद्मावत्याः अवगत्य शय्यायाः एकस्मिन् भागे उपविशति । तत्र च संयोगवशात् पद्मावत्याः अनुपस्थितायां वासवदत्ता तत्र स्थाने विद्यमानस्य उदयनस्य शिरवेदनायाः उपचारं करोति । तदानीं राजा स्वप्ने वासवदत्तायाः नाम स्वीकरोति तदा वासवदत्तां राज्ञः प्रतीति भवति । परन्तु या घटना स्वप्ने घटिता कथ्यते इमां घटनाम् आधृत्य अस्य नाटकस्य नामकरणं कृतमस्ति । किञ्चित् कालोपरान्तं यौगन्धरायणस्य आगमनं भवति । सत्यता च उद्घाटयते ।[17]

इदम् नाटकम् भासस्य समस्तरूपकेषु सर्वश्रेष्ठा रचना अस्ति । उपर्युक्त विवेचनेन भासस्य जन्म कालादि विषये तत् कृतीनां सम्बन्धे यथेष्ठं अपेक्षितं ज्ञानं भवति ।

**सन्दर्भ-सूचिः :-**

1. डा0 गंगासागर राय संस्कृत के प्रमुख नाटककार पृ0सं0 : 1 तथा उनकी कृतियाँ
2. डा0 गंगासागर राय संस्कृत के प्रमुख नाटककार पृ0सं0 : 1 तथा उनकी कृतियाँ
3. साहित्य दर्पण पृ0सं0 : 6/3
4. महामहोपाध्याय भासनाटकचक्रम् पृ0सं0 पं0 टी0 गणपति शास्त्री
5. आचार्य श्री शेषराजशर्मा रेग्मीः स्वप्नवासवदत्तम् पृ0सं0 : 1
6. कान्ति किशोर भरतिया संस्कृतनाटककारः पृ0सं0: 59
7. कान्ति किशोर भरतिया संस्कृतनाटककारः पृ0सं0 : 58
8. डा0 गंगासागर राय संस्कृत के प्रमुख नाटककार पृ0सं0 : 57 तथा उनकी कृतियाँ
9. डा0 गंगासागर राय संस्कृत के प्रमुख नाटककार पृ0सं0 : 56 तथा उनकी कृतियाँ
10. डा0 गंगासागर राय संस्कृत के प्रमुख नाटककार पृ0सं0 : 57 तथा उनकी कृतियाँ
11. डा0 गंगासागर राय संस्कृत के प्रमुख नाटककार पृ0सं0 : 57 तथा उनकी कृतियाँ

12. डा0 गंगासागर राय संस्कृत के प्रमुख नाटककार पृ0सं0 : 56 तथा उनकी कृतियाँ
13. डा0 गंगासागर राय संस्कृत के प्रमुख नाटककार पृ0सं0 : 57 तथा उनकी कृतियाँ
14. आचार्य श्री शेषराजशर्मा रेग्मी: स्वप्नवासवदत्तम् पृ0सं0 : 3/4
15. आचार्य श्री शेषराजशर्मा रेग्मी: स्वप्नवासवदत्तम् पृ0सं0 : 4
16. आचार्य श्री शेषराजशर्मा रेग्मी: स्वप्नवासवदत्तम् पृ0सं0 : 4
17. कान्ति किशोर भरतिया संस्कृतनाटककार: पृ0सं0 : 60